केन्द्रीय विद्यालय

प्रथम आवधिक परीक्षा ( 2024-25)

कक्षा – दशमी विषयः - संस्कृतम्

समयः – 1:30निमेषाः कुल-अङ्काः – 40

निर्देशाः

i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

खण्डः (क) अपठित-अवबोधनम् - 5 अङ्काः

खण्डः (ख) रचनात्मकं कार्यम् - 8 अङ्काः

खण्डः (ग) अनुप्रयुक्त व्याकरणम् - 12 अङ्काः

खण्डः (घ) पठित-अवबोधनम् - 15 अङ्काः

ii) प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।

iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

‘क’ खण्डः अपठित अवबोनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

स्वतन्त्रभारतस्य सम्पूर्ण दायित्वम् अद्य छात्राणामुपरि अस्ति यतः अद्य ये विद्यार्थिनः सन्ति ते एव श्वः स्वतन्त्र भारतस्य नागरिका: भविष्यन्ति। भारतस्य उन्नतिः पतनञ्च तेषामेव उन्नति-पतनयोः निर्भरो स्तः। अतः छात्राः स्वभाविजीवनस्य निर्माणम् अतीव सतर्कतया सावधानतया च कुर्युः, इदमेव तेभ्य: अपेक्षते ते प्रत्येकं क्षणं स्वराष्ट्रं, स्वसमाजं, स्वधर्मं, स्वसंस्कृतिञ्च स्वनेत्रयोः पुरतः निक्षिपेयुः यतः तेषां जीवनेन राष्ट्रं किञ्चिद् बलं प्राप्तुं शक्नुयात्। ये छात्राः राष्ट्रीयदृष्टिकोणात् स्वजीवनस्य निर्माणं न कुर्वन्ति, ते राष्ट्राय, समाजाय वा भारभूताः एव भवन्ति। विद्यार्थिनां लक्ष्यं विद्योपार्जनमेवास्ति। विद्योपार्जनं कृत्वा एव ते राष्ट्रं प्रति स्वकर्तव्यस्य निर्वाहं कर्तुं शक्नुवन्ति ।

**I)** एकपदेन उत्तरत- **1X2= 2**

i) छात्राणामुपरि कस्य दायित्वम् अस्ति?

ii) विद्यार्थिनां लक्ष्यं किम्?

**II)** पूर्णवाक्येन उत्तरत- **2X1= 2**

i) कीदृशाः छात्राः राष्ट्राय समाजाय वा भारभूताः एव भवन्ति?

**III)** शीर्षकलेखनम्- **1X1= 1**

i) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत ।

‘ख’ खण्डः- रचनात्मकं कार्यम्

**2.** भवान् जितेन्द्रः। अमेरिकादेशस्य यात्रायाः वर्णनं कुर्वता स्वमित्रं शशाङ्कम् प्रति लिखितं पत्रं मञ्जूषातः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत । **1/2X8= 4**

दिल्लीतः

तिथिः : …………

प्रिय मित्र! शशाङ्कः !

सस्नेहं (i)……….. ।

वयम् अत्र कुशलिनः। तत्रापि कुशलं कामये । अप्रैल मासस्य (ii)……….. तिथौ अहं iii)……… सह विमानेन अमेरिका देशम् iv) ………। आवाम् अधुना शिकागो नाम्नि नगरे स्वः। v)………… अत्र रेलयानेन बसयानेन च यात्रां कुर्वः । जनाः अत्र स्वकर्तव्यं, vi)…………. च प्रति अतीव जागरूकाः सन्ति। अमेरिका तु अतीव vii)…………… देशः अस्ति । जनाः अवकरम् अवकरपात्रे एव क्षिपन्ति। जूनमासस्य सप्तम्यां तिथौ अहं स्वदेशम् आगमिष्यामि। आगत्य विस्तरेण वदिष्यामि। गृहे viii)………. मम नमस्काराः ।

भवतः प्रियं मित्रम्

जितेन्द्रः

| |
|---|
| सुन्दरः, सर्वेभ्यः, अगच्छम्, आवाम्, स्वच्छताम्, एकादश्याम्, नमस्काराः, जनकेन |

**3.** चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि संस्कृतेन लिखत- **1X4= 4**



| |
|---|
| मञ्जूषाः- पलायितौ, धृत्वा, कुर्वन्ति, देशरक्षकेभ्यः, सैनिकाः, नमः, अन्ताराष्ट्रियसीमायाः, अवैधप्रवेशम्, प्रहरिणः, भुशुण्डिं, परितः, पर्वताः, दृष्ट्वा, आतङ्कवादिनौ, देशरक्षकान्, सन्नध्दाः |

अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया ग्रामीण-जीवनम् इति विषयम् अधिकृत्य चत्वारिवाक्यानि संस्कृतेन लिखत।

| |
|---|
| मञ्जूषाः- शिक्षिताः, जनाः सर्वसुविधासम्पन्नाः, क्षेत्राणि, सिञ्चति, अपि, विद्यालयः वैज्ञानिकविधिना, अस्ति, कुर्वन्ति, कृत्रिम, पठन्ति, हरीतिमा, सर्वत्र, प्रदूषणरहितम्। |

‘ग’ खण्डः- अनुप्रयुक्त व्याकरणम्

**4.** मञ्जूषां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत- **1X3=3**

रमेशः- किम् अशोकः पाठं पठति?

सुधा- आम्, अशोकेन (i)…………… पठ्यते।

सुधाकरः- किं दिनेशः अध्यापकं नमस्करोति?

अशोकः- आम् (ii)……………….अध्यापकः नमस्क्रियते।

शिक्षकः- किं तव माता आपणात् फलानि आनयति?

छात्रः- आम्, मम मात्रा आपणात् फलानि (iii) ..................।

| मञ्जूषा- आनीयन्ते, दिनेशेन, पाठः |
|---|

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। **1X3= 3**

i) **शक्ति + मतुप्** जनः सर्वं रक्षति।

अ) शक्तिमान् ब) शक्तिमानः स) शक्तिवान् द) शक्तियत्

ii) श्रद्धावान लभते ज्ञानम्।

अ) श्रद्धा+मतुप् ब) श्रद्धा+वत् स) श्रद्धा+वतुप् द) श्राद्ध+मतुप्

iii) धनस्य महत्त्वं सर्वे जानन्ति।

अ) महा+त्वम् ब) मह+त्व स) महत्+त्व द) महत्+शतृ

**6.** अधोलिखित वाक्येषु रेखाङ्कितपदम् स्थाने प्रदत्तविकल्पेभ्यः शुद्धपदानि लिखत। **1X3= 3**

i) विद्वान् सर्वत्र पूज्यन्ते।

अ) पूज्यते ब) पूज्येते स) पूज्ये द) पूजय

ii) ते दशरथस्य पुत्राणि सन्ति।

अ) पुत्रान् ब) पुत्रः स) पुत्राः द) पुत्रम्

iii) अहम् अध्ययनशीलः असि ।

अ) अस्ति ब) अस्मि स) स्तः द) सन्ति

**7.** सन्धिं/सन्धिविच्छेदं वा कुरुत - **1X3= 3**

i) कथमेकैकशो गगने शोभते ।

ii) मृगैश्च भगवन् तुभ्यम् ।

iii) सः+अपि मया सह गमिष्यति ।

## 'घ' खण्डः- पठित-अवबोधनम्

**8.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यक कार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितगृहं प्रति चलिता मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद-"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद अन्यो द्वितीयः कश्चिल्लक्ष्यते।" इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्रो नष्टः।

एकपदेन उत्तरत- **1/2X2= 1**

i) राजसिंहः नाम राजपुत्रः कुत्र वसति स्म?

ii) भार्यायाः किं नाम आसीत्?

**II)** पूर्णवाक्येन उत्तरत- **1X1= 1**

i) बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता?

**III)** भाषिककार्यम्- **1X3= 3**

i) "मार्गे गहन कानने सा एकं व्याघ्रं ददर्श" अत्र 'सा' पदं कस्मै प्रयुक्तम्?

ii) 'विक्ष्य' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत।

iii) 'पितृगृहम्' पदे सन्धिच्छेदं कुरु?

**9.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-

किञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्।
प्रपश्यामि ग्रामान्ते निर्झर नदी-पयः-पूरम्।।
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् ।।

**I)** एकपदेन उत्तरत- **1/2X2= 1**

i) अस्मान् कस्मात् बहुदूरं नय?

ii) कुत्र निर्झर नदी-पयः-पूरम् अस्ति?

**II)** पूर्णवाक्येन उत्तरत- **1X1= 1**

i) कविः कुत्र सञ्चरणं कर्तुम् इच्छति?

**III)** भाषिककार्यम्- **1X3= 3**

i) 'नगराद्' इत्युक्ते कः कारकः प्रयुक्तः?

ii) 'एकान्ते कान्तारे क्षणमपि सञ्चरणम् स्यात्', इति वाक्ये किं विशेषणपदं प्रयुक्तम्?

iii) 'अस्मान्' इत्यस्य पदस्य मूल शब्दः किम् अस्ति?

**10.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणम् कुरुत । **1X3= 3**

i) शकटीयानम् कज्जलमलिनं धूमं मुञ्चति।

ii) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।

iii) महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयाः धावन्ति।

**11.** निम्नलिखितवाक्यानि घटनाक्रमानुसारं पुनर्लिखत- **1/2X4= 2**

अ) मार्गे सा एकं व्याघ्रम् अपश्यत्।

आ) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

इ) बुद्धिमती पुत्रद्वयेन उपेता पितृगृहं प्रति चलिता।

ई) गलबद्धः शृगालः व्याघ्रः पुनः पलायितः।